परिधय: पालाशकाष्ठका: खादिरौदुम्बरविल्वरोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्रा: शुष्करसत्वच्का: ॥” इति ॥ * ॥ ) भूगोलादेर्वेष्टनम् । यथा,—

“व्यासेभनन्दाग्निहते विभक्ते
खवाणसूर्य्यै: परिधिस्तु सूक्ष्म: ॥”
इति लीलावती ॥

( क्ली, परिधीयते यदिति । परि+धा+कर्म्मणि कि: । परिधेयवस्त्रम् । यथा, भागवते । ८ । ७ । १७ ।

“मेघश्याम: कनकपरिधि: कर्णविद्योतविद्युन्मूर्द्ध्नि भ्राजद्विलुलितकच: स्रग्धरो रक्तनेत्र: ॥”
“कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य” इति तट्टीका ॥ )

परिधिस्थ:, पुं, ( परिधौ तिष्ठतीति । परिधि+स्था+क: । ) परिचर: । इत्यमर: ।२ ।८।६२ ॥ युद्धकाले परप्रहारात् रथरक्षके । प्रजासामन्तव्यवस्थापनकारिणीति केचित् । सेनायां राज्ञो दण्डनायक: । इत्यन्ये । इति भरत: ॥

परिधेयं, त्रि, ( परिधातुं शक्यम् । परि+धा+“अचो यत् ।” ३ । १ । ६७ । इति यत् “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् ततो गुण: । ) परिधानीयम् । परिधातव्यम् । परिधानोपयुक्तवस्त्रादि । यथा,—

“न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्तुतेरदृष्टार्थत्वापत्ते: ।” इति विवादचिन्तामणि: ॥

परिपणं, क्ली, ( परिपण्यते व्यवह्रियतेऽनेन । परि+पण्+“पुंसि संज्ञायां घ: प्रायेण ।” ३ । ३ । ११८ । इति घ: । ) मूलधनम् । इत्यमर: । २ । ९ । ८० । पुँजि इति भाषा ॥

परिपन्थक:, पुं, ( परिपन्थयति दोषादिकं प्राप्नोतीति । परि+पथि क गतौ+ण्वुल् । ) शत्रु: । इति हेमचन्द्र: । ३ । ३९३ ॥ ( यथा, महाभारते । १० । १६ । ३१ ।

“हतो दुर्य्योधन: पापो राज्यस्य परिपन्थक: ॥”)

परिपन्थी, [ न् ] त्रि, ( परिसर्व्वतो भावेन दोषाख्यानं पन्थयितुं शीलमस्य । परि+पन्थ+णिनि: । ) शत्रु: । इत्यमर: । २ । ८ । ११ । ( यथा, गीतायाम् । ३ । ३४ ।

“इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥”

प्रतिकूलाचारी । यथाह कश्चित् ।

“अपराधिनि चेत् क्रोध: क्रोधे क्रोध: कथं नहि ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥”)

परिपाक:, पुं, ( परिपच्यते इति । परि+पच्+घञ् ।) परिपक्वता । यथा, भावप्रकाशे ।

“इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्य: परिपाकमेति ।”

नैपुण्यम् । यथा,—

“वीक्ष्य तस्य विनये परिपाकं
पाकशासनपदं स्पृशतोऽपि ।”
इति नैषधपञ्चमसर्ग: ॥

परिपाकिनी, स्त्री, ( परिपाक: परिपाकशक्तिर्विद्यतेऽस्या: । परिपाक+इनि+ङीप् । ) त्रिवृता । इति शब्दचन्द्रिका ॥

परिपाटि:, स्त्री, ( परिपाटनम् । परि+पट्+स्वार्थे णिच्+अच इ: । यद्वा परि भागे भागेन पाटि: पाटनं गतिर्यस्याम् ।) पारिपाट्यविशिष्ट: । तत्पर्य्याय: । आनुपूर्व्वी २ आवृत् ३ अनुक्रम: ४ पर्य्याय: ५ । इत्यमर: ।२।७। ३७ ॥ आनुपूर्व्वम् ६ परिपाटी ७ । इति भरत: ॥ आनुपूर्व्वम् ८ आनुपूर्व्वकम् ९ । इति टीकान्तरम् ॥ क्रम: १० । इति जटाधरशब्दरत्नावल्यौ ॥

परिपिष्टकं, क्ली, ( परि+पिष्+क्त+संज्ञायां कन् । ) सीसकम् । इति राजनिर्घण्ट: ॥

परिपुष्करा, स्त्री, ( परित: पुष्करं मुखं यस्या: ।) गोडुम्बा । इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥

परिपूतं, क्ली, ( परि+पू+क्त: । ) अपास्ततुषधान्यम् । यथा, मनु: ।

“परिपूतेषु धान्येषु शाकमूलफलेषु च ।
निरन्वये शतं दण्ड: सान्वयेऽर्द्धशतं दम: ॥”

त्रि, सर्व्वतोभावेन पवित्रम् ॥ (यथा, माघे ।२।१६ ।

“घूर्णयन् मदिरास्वादमदपाटलितद्युती ।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥” )

परिपूर्णता, स्त्री, ( परिपूर्णस्य भाव: । परिपूर्ण+“तस्य भावस्त्वतलौ ।” ५ । १ । ११९ । इति तल् तत: “त्वान्तं क्लीवन्तलन्तं स्त्रियाम् ।” इति वार्त्तिकोक्तत्वात् स्त्रियां टाप् । ) परिपूर्णत्वम् । सम्पूर्णता । तत्पर्य्याय: । आभोग:२ । इत्यमर: । २ । ६ । १३७ ॥

परिपूर्णत्वं, क्ली, ( परिपूर्णस्य भाव: । “तस्य भावस्त्वतलौ ।” ५ । १ । ११९ । इति त्व । तत: क्लीवत्वम् ।) परिपूर्णता । सम्पूर्णत्वम् । इति जटाधर: ॥ ( यथा,—

“दृश्यते परिपूर्णत्वं मुखचन्द्रस्य ते सखि ! ।
न जाने कश्चकोरं हि विधाता पालयिष्यति ॥”
इत्युद्भट: ॥ )

परिपेलं, क्ली, ( परिपेलति मृदुतां गच्छतीति । पेल गतौ+अच् । ) परिपेलवम् । कैवर्त्तीमुस्तकम् । इति शब्दमाला ॥ तन्त्रान्तरे यथा,—

“परिपेलं प्लवं वन्यं तत्कुटन्नटसंज्ञकम् ।
जायते मुस्तकाकारं शैवालकुलसञ्चये ॥”
इत्यमरटीकायां भरत: ॥

परिपेलवं, क्ली, (परि सर्व्वत: पेलवं मृदुता यस्य ।) कैवर्त्तीमुस्तकम् । इत्यमर: । २ । ४ । १३१ ॥ (अत्यन्तकोमले, त्रि । यथा, वृहत्संहितायाम् । ६४ । ८ ।

“स्फीतमध्यपरिपेलवं फलं
शीघ्रमध्यचिरकालसम्भवम् ॥”

गुणादयोऽस्य कैवर्त्तीमुस्तकशब्दे ज्ञेया: ॥)

परिप्लवं, त्रि, ( परिप्लवते इति । प्लु+अच् । ) चञ्चलम् । इत्यमर: । ३ । १ । ३५ ।

( यथा, माघे । १४ । ६८ ।

“मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुष: ।
गच्छत: स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥”

पुं, राज्ञ: सुखीनलस्य पुत्त्र: । यथा, भागवते । ९ । २२ । ४२ ।

“सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनल: ।
परिप्लव: सुतस्तस्मान्मेधावी सुनयात्मज: ॥” )

परिप्लुत:, त्रि, ( परिप्लु+क्त: । ) जलादिप्लावित: । यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्याय: ॥

“आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता ॥”

परिप्लुता, स्त्री, ( परि+प्लु+क्त: । स्त्रियां टाप् । ) मदिरा । इति हेमचन्द्र: । ३ । ५६६ ॥ ग्राम्यधर्म्मे (मैथुने) वेदनावती योनि: । यथा,—

“परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम् ।”
इति योनिव्यापन्निदाने माधवकर: ॥

(“पित्तलाया नृसंवासे क्षवथूद्गारधारणात् ।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रिया: ॥
शूनास्पर्शाक्षमासार्त्तिर्नीलपीतमसृक् स्रवेत् ।
श्रोणीवंक्षणपृष्ठार्त्तिज्वरार्त्ताया: परिप्लुता ॥”
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)

आप्लुते त्रि ॥

परिवर्ह:, पुं, ( परिवर्ह्यतेऽनेन । वर्ह प्राधान्ये+घञ् । ) परिच्छद: । हस्त्यश्ववस्त्रकम्बलादि । नृपार्होऽर्थ: । राजयोग्यद्रव्यं सितच्छत्रादि । नृपार्हं सितच्छत्रादि अर्थो धनमिति केचित् । इत्यमरभरतौ ॥ (यथा,—

“निवेश्य गङ्गामनु तां महानदीं
चमूं विधानै: परिवर्हशोभिनीम् ।
उवास रामस्य तदा महात्मनो
विचिन्तमानो भरतो निवर्त्तनम् ॥”
इति रामायणे । २ । ८३ । २६ । )

परिभव:, पुं, ( परि+भू+अप् । ) अनादर: । इत्यमर: । १ । ७ । २२ ॥ (यथा, रघु: ।१२।३७।

“फलमस्योपहासस्य सद्य: प्राप्स्यसि पश्य मां ।
मृग्या: परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥”)

परिभाव:, पुं, (परि+भू+“परौ भुवोऽवज्ञाने ।” ३ । ३ । ५५ । इति घञ् ।) परिभव: । इत्यमर: । १ । ७ । २२ ॥

परिभाषणं, क्ली, ( परि+भाष्+ल्युट् । ) सनिन्द उपालम्भ: । इत्यमर: । १ । ६ । १४ ॥ उपालम्भो दुर्व्वाद: । निन्दया सह वर्त्तमानो य उपालम्भस्तत्र सनिन्दे परिभाषणम् । उपालम्भो गुणाविष्करणेन स्तुतिपूर्व्वकोऽपि भवति । यथा महाकुलस्य भवत: किमिदमुचितं भवति । अत्र तु सस्तुतौ न परिभाषणम् । टीकान्तरेऽपि बन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्व: । महाकुलस्य तव कथं विप्रवध: । इति स्तुतिपूर्व्वस्य उपालम्भ: । इति भरत: ॥ * ॥ नियम: । इति मेदिनी ॥ आलाप: । इति विश्व: ॥